# राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः

## विशिष्टाचार्यप्रवेशपरीक्षा -2020

## प्रश्नपत्रम्

विषयः- व्याकरणम् पूर्णाङ्काः-100

1 "वयं तत्त्वान्वेषान्मधुकर ! हतास्त्वं खलुकृती" इति वाक्येन अन्वेषणा-पदस्य प्रयोगः केन विहितः ?

A माघेन B कालिदासेन

C विष्णुशर्मणा D श्रीहर्षेण

2 अनुसन्धानस्य कोऽर्थः ?

A पुनः पुनः निरीक्षणम्

B समस्यायाः कृते निवारणोपायान्वेषणम्

C वैज्ञानिकोपायैः समस्यायाः सत्यासत्यप्रघटनम्

D विषयविस्तारं कृत्वा शोधप्रबन्धलेखनम्

3 अधोलिखितेषु अनुसन्धानस्य प्रथमं सोपानं किम् ?

A समस्यासहायकसामग्रीसङ्कलम्

B समस्यायाः मूल्याङ्कनम्

C समस्यानिर्वाचनम्

D समस्यासमाधानाय प्रयासः

4 अनुसन्धाने प्रतिपादितानि तथ्यानि कीदृशानि स्युः ?

A नमनीयानि B व्यावहारिकाणि

C मौलिकानि D एतत्सर्वम्

5 अधो लिखितेषु किं पदम् "अनुसन्धानम्" इतिपदेन समानार्थकं न भवति ?

A गवेषणम् B शोधसन्दर्भः

C संशोधनम् D परिशोधनम्

6 गुणात्मकानुसन्धाने अधोलिखितेषु किं नोपयुज्यते ?

A आगमनात्मकविश्लेषणम् (Individual Analysis)

B नैसर्गिकाध्ययनम् (Naturalistic Enquiry)

C अन्तर्दृष्टिः (Insight)

D संरचितसाक्षात्कारः (Structured Intervies)

7 “विमर्श” इति शब्दस्य कोऽर्थः ?

A कस्यापि मतस्य व्यङ्ग्यार्थनिर्धारणम्

B कस्यापि मतस्य व्यापकार्थपरिशीलनम्

C कस्यापि मतस्यानुवदनम्

D कस्यापि मतस्य स्वीकारः परिहारो वा

8 “भारतीयग्रन्थसम्पादनशास्त्रप्रवेशिनी” ग्रन्थः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन कदा प्रकाशितः --

A 2001 B 2002

C 2010 D 2011

9 अधोलिखितेषु चिन्तनशीलप्रश्नः (Reflective Inquiry) कुत्र न प्रचलति ?

A ज्ञानमीमांसायाम् (In epistemology)

B मूल्यमीमांसायाम् (In axiology)

C अध्यात्मशास्त्रे (In metaphysics)

D ऐतिहासिकानुसन्धाने (In historical Research)

10 अधोलिखितेषु किम् ऐतिहासिकानुसन्धानस्य क्षेत्रमुच्यते ?

A अर्थनीतिः B सभ्यता

C अभिलेखः D एतत्सर्वम्

11 आधुनिकोपकरणेषु किं नान्तर्भवति ?

A अन्तर्जालम् B ई - शोधपत्रिका

C ग्रन्थसूची D ई – कोषाः

12 अधोलिखितेषु कानि सामग्रीसङ्कलने प्राथमिकस्रोतांसि भवन्ति ?

A शोधपत्रिकाः B शासकीयानि अभिलेखानि

C साहित्येतिहासः D कोशाः

13 संस्कृतवाङ्मये पुराणानि प्रामुख्येन कीदृशम् अनुसन्धानं सूचयन्ति ?

A ऐतिहासिकम्  B दार्शनिकम्

C संख्यात्मकम्  D प्रायोगिकम्

14 आगमशास्त्रेषु अनुसन्धानस्य प्रधानं क्षेत्रं किम् ?

A आलयसंस्कृतिः  B सौन्दर्यसाधनम्

C आत्मतत्त्वविमर्शः  D राजतन्त्रसंस्कृतिः

15 राष्ट्रियपाण्डुलिपि मिषन् इति संस्थायाः ध्येयवाक्यं किम् ?

A या विद्या सा विमुक्तये  B तमसो मा ज्येतिर्गमय

C विज्ञानमुपास्व  D मातृकां रक्षत

16 "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति अनुसन्धानसूत्रं कुत्र वर्तते ?

A तैत्तिरीयोपनिषदि  B कठोपनिषदि

C बृहदारण्यकोपनिषदि  D प्रश्नोपनिषदि

17 अनुसन्धानप्रविधेः कृते अपेक्षिताः षोडश पदार्थाः कस्मिन् दर्शने प्राप्यन्ते ?

A वेदान्तदर्शने  B सांख्यदर्शने

C न्यायदर्शने  D योगदर्शने

18 अनुसन्धानाय अपेक्षितानि प्रमाण-प्रमेय-विमर्श-निर्णय-प्रवृत्त्याख्यानि तत्त्वानि कुत्र वर्णितानि ?

A युक्तिदीपिकायाम्  B शृङ्गारप्रकाशे

C रामायणे  D श्रीमद्भगवद्गीतायाम्

19 "भारतस्य संस्कृतपत्रिकाः पत्रकाराश्च" इति कीदृशम् अनुसन्धानम्?

A सर्वेक्षणम्  B शास्त्रीयम्

C तुलनात्मकम्  D क्षेत्रीयम्

20 "विमूढाः नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः" इति कुत्रोक्तम् ?

A रामायणे  B स्कन्दपुराणे

C गीतायाम्  D भागवते

21 "अथ शब्दानुशासनम्" इत्यनेन इह पाणिनीये केषां शब्दानामनुशासनम् क्रियते ?

A लौकिकानाम् B वैदिकानाम्

C लौकिकानां वैदिकानां च D उणादीनाम्

22 “शब्दानामनुशासनम्” इति विवरणवाक्ये शब्दानामित्यत्र केन सूत्रेण षष्ठी?

A षष्ठी शेषे B उभयप्राप्तौ कर्मणि

C कर्तृकर्मणोः कृति D विभाषोपसर्गे

23 “लोपागमवर्णविकारज्ञो हि सम्यग्वेदान्परिपालयिष्यतीति” इति वाक्ये लोपागमवर्णविकारज्ञशब्देन भाष्यकारेण कोऽभिप्रेतः?

A वैयाकरणः B मीमांसकः

C नैयायिकः D वेदज्ञः

24 “प्रधानं च षट्स्वङ्गेषु ...............”।

A निरुक्तम् B व्याकरणम्

C ज्यौतिषम् D शिक्षा

25 “असन्देहार्थं चाध्येयं व्याकरणम्” इत्यत्र असंदेह इति कोऽभावो विवक्षितः?

A प्रागभावः B प्रध्वंसाभावः

C अत्यन्ताभावः D अन्योन्याभावः

26 स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत’ इति वाक्ये स्थूलपृषतीत्यत्र कः समासः

A बहुव्रीहिः B तत्पुरुषः

C कर्मधारयः D द्वन्द्वः

27 “यथेन्द्रशत्रुः स्वरतोऽपराधात्” इत्यादिदृष्टान्ते ‘शत्रुः’ इत्यस्य कोऽर्थः ?

A अमित्रम् B रिपुः

C विरोधी D शातयिता

28 भ्राजा नाम के ?

A श्लोकाः B ऋचः

C मन्त्राः D गीतम्

29 प्रयाजाः सविभक्तिकाः कार्याः इति वाक्ये प्रयाजशब्दस्य कोऽर्थः ?

A प्रयाजमन्त्राः B श्लोकाः

C प्रकृतयः D प्रत्ययाः

30 “चत्वारि शृङ्गा त्रयो अस्य पादा” इत्यादिमन्त्रे ‘त्रयः’ इति शब्देन भाष्यकारेण किं विवक्षितम् ?

A त्रीणि वचनानि  B त्रयः कालाः

C आद्यविभक्तित्रयम्  D त्रीणि स्थानानि

31 यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते, तद्वद् वाक् कस्मै स्वात्मानं विवृणुते ?

A योगविदे  B वाग्विदे

C अर्थाय  D दैवज्ञाय

32 ‘सक्तुमिव तितउना पुनन्त’ इत्यादिमन्त्रे ‘तितउ’शब्दस्य कोऽर्थः ?

A शब्दाः  B वाक्

C अर्थः  D चालनी

33 पुराकल्पे संस्कारोत्तरकालं ब्राह्मणाः किमधीयते स्म ?

A मीमांसाम्  B वेदान्

C व्याकरणम्  D शिक्षाम्

34 शब्दानुशासने शब्दोपदेशः कर्तव्य उत अपशब्दोपदेशः अथवा उभयोरप्युपदेशः इत्यत्र भाष्यकारसिद्धान्तः कः ?

A शब्दोपदेशः  B अपशब्दोपदेशः

C उभयोरुपदेशः  D न कर्तव्यः

35 चतुर्भिश्च प्रकारैः विद्योपयुक्ता भवति’ इत्यत्र तृतीयः प्रकारः कः ?

A प्रवचनकालः  B आगमकालः

C व्यवहारकालः  D स्वाध्यायकालः

36 वैयाकरणानां मते शब्दो भवति ?

A नित्यः  B कार्यः

C व्युत्पाद्यः  D शब्दजः

37 सङ्ग्रहग्रन्थस्य कर्ता भवति –

A पाणिनिः  B व्याडिः

C भर्तृहरिः  D कात्यायनः

38 “सिद्धे शब्दार्थसम्बन्धे” इति वार्तिके नित्यपर्यायवाची सिद्धशब्दः किमर्थः प्रयुक्तः ?

A मङ्गलार्थः B असन्देहार्थः

C यदृच्छया D पूर्वोक्तेषु न किमपि

39 लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण ....... ?

A अर्थनियमः B शास्त्रनियमः

C धर्मनियमः D प्रयोगनियमः

40 धर्मनियमः इत्यत्र कीदृशो विग्रहो भाष्ये स्वीकृतः?

A धर्माय नियमः B धर्मार्थो वा नियमः

C धर्मप्रयोजनो वा नियमः D पूर्वोक्तत्रयमपि

41 प्रियतद्धिताः दाक्षिणात्याः इति भाष्यवाक्ये दाक्षिणात्यशब्देन को विवक्षितः?

A वार्तिककारः B भाष्यकारः

C सूत्रकारः D सङ्ग्रहकारः

42 समानायामर्थगतौ शब्देनापशब्देन च अर्थाभिधाने केन धर्मनियमो भवति?

A शब्देन B अपशब्देन

C उभाभ्याम् D नोभाभ्याम्

43 भाष्यकारमतरीत्या सामवेदस्य कति शाखाः सन्ति ?

A एकशतम् B द्विशतम्

C नव D सहस्रम्

44 शवतिर्गतिकर्मा कुत्र भाषितो भवति ?

A अङ्गेषु B कम्बोजेषु

C बङ्गेषु D कलिङ्गेषु

45 सुराष्ट्रेषु गतिकर्मणि हम्मतिः प्रयुज्यते तथा प्राच्यमध्येषु को धातुः प्रयुज्यते?

A गमिः B शवतिः

C रंहतिः D हम्मतिः

46 शब्दस्य ज्ञाने धर्मः उत प्रयोगे ?

A ज्ञाने B प्रयोगे

C शास्त्रज्ञानपूर्वके प्रयोगे D उक्तेषु न किमपि

47 यर्वाणस्तर्वाणो नाम के ?

A वेदमन्त्राः B ऋषयः

C असुराः D वेदशाखाः

48 पाणिनिना प्रोक्तम् = ........ ?

A पाणिनीयम् B पाणिनम्

C पाणिनः D पाणिनिः

49 किमर्थो वर्णानामुपदेशः क्रियते ?

A वृत्तिसमवायार्थः B अनुबन्धकरणार्थः

C इष्टबुद्ध्यर्थः D पूर्वोक्तं सर्वम्

50 "वृत्तिसमवायार्थ उपदेशः" इत्यत्र का नाम वृत्तिः ?

A शक्तिः B समासादिपञ्चवृत्तिः

C शास्त्रप्रवृत्तिः D लक्षणावृत्तिः

51 वृत्तिसमवायार्थ उपदेशः" इत्यत्र को नाम समवायः ?

A वर्णानामानुपूर्व्येण सन्निवेशः B समवायाख्यः सम्बन्धः

C समूहः D पूर्वोक्तेषु न किमपि

52 वृत्तिसमवायार्थ उपदेशः" इत्यत्र उपदेशशब्देन किमुच्यते ?

A ज्ञानम् B उच्चारणम्

C प्राप्तिः D समीपवर्तिदेशः

53 वृत्तिसमवायश्च अनुबन्धकरणञ्च किमर्थम् ?

A प्रत्याहारार्थम् B शास्त्रप्रवृत्त्यर्थम्

C उच्चारणार्थम् D इत्संज्ञार्थम्

54 इष्टबुद्ध्यर्थश्च वर्णानामुपदेशः" इत्यत्र इष्टबुद्धिर्नाम का ?

A इष्टसिद्धिः B अभीष्टप्राप्तिः

C इष्टवर्णबोधनम् D वर्णोच्चारणम्

55 आकृत्युपदेशात् सिद्धमिति चेत् केषां प्रतिषेधो वक्तव्यः ?

A निरनुनासिकानाम् B उदात्तादीनाम्

C अनुनासिकानाम् D संवृतादीनाम्

56 निरस्तः इति शब्दस्य कोऽर्थः?

A निष्ठुरः B निराकृतः

C निर्गतः D अस्तङ्गतः

57 रोमशः इत्यस्यार्थो भवति –

A लोमशः B संश्लिष्टः

C रूक्षः D गम्भीरः

58 निर्हतः इत्यस्यार्थो वर्तते –

A रूक्षः B हिंसितः

C निवृत्तः D निर्वृत्तः

59 संवृतादयो भवन्ति –

A अनुच्चारितवर्णाः B स्वरदोषाः

C व्यञ्जनदोषाः D वाक्यदोषाः

60 आगमाश्च विकाराश्च ...........सह धातुभिः। उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः कलादयः॥

A प्रातिपदिकानि B निपाताः

C प्रत्ययाः D आदेशाः

61 "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्" इत्यत्र कीदृशव्याख्यानं विवक्षितम् ?

A स्वीयम् B शिष्टकृतम्

C वेदोक्तम् D विशिष्टम्

62 अलक्षणम् इत्यस्य कोऽर्थः ?

A अननुष्ठापकम् B सूत्रभिन्नम्

C ज्ञापकभिन्नम् D लिङ्गभिन्नम्

63 "अणुदित्सवर्णस्य चाप्रत्ययः" इति सूत्रे केन णकारेण अण् गृह्यते –

A पूर्वेण B परेण

C मध्यमेन D पूर्वपराभ्याम्

64 तत्र संज्ञापरिभाषाविषये कति पक्षाः शास्त्रे उक्ताः ?

A पञ्च B त्रयः

C द्वौ D चत्वारः

65 उद्देश-शब्देन किमुच्यते ?

A उपदेशदेशः B प्रयोजनम्

C तात्पर्यम् D व्यवहारः

66 संज्ञाशास्त्रस्य तु कार्यकालपक्षे न पृथग्व्याक्यार्थबोधः, किन्तु .............. सहैव।

A परिभाषावाक्येन B एकवाक्यतया

C प्रदेशवाक्येन D नियमवाक्येन

67 आकडाराधिकारस्थभपदसंज्ञादिविषये बाध्यबाधकभावनिर्णये कः पक्षः आद्रियते ?

A यथोद्देशपक्षः B कार्यकालपक्षः

C पक्षद्वयमपि D लक्ष्यानुरोधेन कामचारः

68 "अनेकान्ता अनुबन्धाः" इत्यत्र अनेकान्तशब्दस्य कोऽर्थः ?

A अवयवाः B अनवयवाः

C अनेके वर्णाः D अन्त्यवर्णाः

69 एकान्तानेकान्तत्वपक्षयोः कः पक्षो न्याय्यः ?

A एकान्तत्वपक्षः B अनेकान्तत्वपक्षः

C पक्षद्वये कामचारः D पक्षद्वयमपि व्यर्थम्

70 "नानुबन्धकृतमनेकाल्त्वम्" इत्यस्याः परिभाषाया ज्ञापकं किम् ?

A अनेकाल्शित्सर्वस्य इति सूत्रम् B अनेकाल्सूत्रे शिद्ग्रहणम्

C प्रथमस्य डारौरसः इति सूत्रम् D अष्टाभ्य औश्

71 61. "नानुबन्धकृतमनेजन्तत्वम्" इति परिभाषायाः ज्ञापकं किम् ?

A उदीचां माङो व्यतिहारः इति निर्देशः

B दाधाघ्वदाप् इति निर्देशः

C एरच् इति सूत्रम्

D आदेच उपदेशेऽशिति इत्यत्र आदेज्ग्रहणम्

72 "वाऽसरूपोऽस्त्रियाम्" इति सूत्रेण कप्रत्ययविषये अण्प्रत्ययस्य आपत्तिवारणाय का परिभाषा आरब्धा ?

A अनेकान्ता अनुबन्धाः B एकान्ताः

C नानुबन्धकृतमसारूप्यम् D नानुबन्धकृतमनेजन्तत्वम्

73 ‘कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः’ इति न्यायेन सङ्ख्याग्रहणे केषां ग्रहणं स्यादिति आपाद्यते ?

A एकद्व्यादीनाम्  B बह्वादीनाम्

C संख्याशब्दस्य  D परिमाणवाचकानाम्

74 “संख्याया अतिशदन्तायाः कन्” इति निषेधः कां परिभाषां ज्ञापयति ?

A कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः

B गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः

C उभयगतिरिह भवति

D व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्

75 आम्रेडितशब्देन कस्य ग्रहणं भवति ?

A तस्य परमाम्रेडितसूत्रोक्तस्य  B द्विस्त्रिर्घुष्टमात्रस्य

C आम्रेडितशब्दस्य  D एकद्व्यादीनाम्

76 व्याख्यानात् शास्त्रे कृत्रिमाकृत्रिमयोरुभयोरपि ग्रहणसम्भवतात् “कर्तरि कर्मव्यतिहारे” इत्यत्र कृत्रिमस्य ग्रहणमुत अकृत्रिमस्य ?

A अकृत्रिमस्य  B कृत्रिमस्य

C उभयोः  D नोभयोः

77 “कार्यमनुभवन् हि कार्य्यी ............. नाश्रीयते”।

A आदेशत्वेन  B आगमत्वेन

C ज्ञापकत्वेन  D निमित्ततया

78 “कार्यमनुभवन् हि कार्य्यी” इत्यादिपरिषायां ‘कार्यमनुभवन्’ इति विशेषणं किमर्थम् ?

A ऊर्णुनविषतीत्यादिसिद्धये  B शयिता

C अध्येता  D बभूव

79 ऊर्णुनविषति इत्यत्र “द्विर्वचनेऽचि” इति सूत्रेण कस्य द्वित्वम् ?

A न्-मात्रस्य  B नु-शब्दस्य

C ऊर्णुशब्दस्य  D ऊर्ण्-इत्यस्य

80 “यदागमास्तदगुणीभूतास्तद्ग्रहणेन गृह्यन्ते” इति परिभाषा किंसिद्धा ?

A लौकिकन्यायसिद्धा B ज्ञापकसिद्धा

C उभयथा सिद्धा D वाचनिकी

81 यदागमपरिभाषायाः अनित्यत्वस्य किं फलम्?

A प्रनिदारयति इत्यत्र णत्वाभावः B पचमान इति सिद्धिः

C प्रणिदापयति इत्यत्र णत्वसिद्धिः D पूर्वोक्तेषु न किमपि

82 ऋकारस्य गुणवृद्धी ................।

A अरारावेव B इरीरावेव

C उभयम् D न भवतः

83 'गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिर्वर्तते' इति कस्मिन् भाष्ये उक्तम् ?

A "कृपो रो लः" इत्यत्र B वृद्धिरादैच्" इत्यत्र

C "इको गुणवृद्धी" इत्यत्र D रदाभ्यां निष्ठात" इत्यादिसूत्रे

84 स्थानिवत्सूत्रे कीदृशस्थान्यादेशभावस्य न ग्रहणम्?

A अष्टाध्यायीबोधितानुमानिकस्थान्यादेशभावस्य

B श्रौतस्थान्यादेशभावस्य

C अर्थापत्तिमूलकवाक्यकल्पितस्थान्यादेशभावस्य

D पूर्वोक्तत्रयमपि

85 यदागमपरिभाषास्वीकारात् उदस्थात् इत्यत्र "उदः स्थास्तम्भोः पूर्वस्य" इति पूर्वसवर्णापत्तिरूपदोषः कथं वार्यते ?

A निर्दिश्यमानपरिभाषया B यदागमपरिभाषायाः अनित्यत्वात्

C स्थानिवत्सूत्रेण D भाष्यकारेष्ट्या

86 निर्दिश्यमानपरिभाषा कीदृशी वर्तते ?

A ज्ञापकसिद्धा

B न्यायसिद्धा

C षष्ठी स्थानेयोगा इति आवृत्तसूत्रार्थभूता

D यदागमपरिभाषाऽनित्यत्वार्थेन सिद्धा

87 "अस्य च्वौ" इत्यादौ निर्दिश्यमानत्वाभावात् दीर्घाणामादेशानापत्तिरूपदोषः कस्मिन् पक्षे नास्ति?

A व्यक्तिपक्षे | B जातिपक्षे

C पक्षद्वयेऽपि | D (क) पूर्वोक्तत्रयमपि न

88 वर्णग्रहणे निर्दिश्यमानपरिभाषा ………..?

A न प्रवर्तते | B प्रवर्तते

C लक्ष्यानुसारिकामचारः | D बाहुलकवत् प्रवृत्तिः

89 "आदेः परस्य" "अलोऽन्त्यस्य" इत्येतौ निर्दिश्यमानपरिभाषाबाधकौ इति कस्य मतम्?

A कौस्तुभकारस्य | B नागेशस्य

C माधवस्य | D भर्तृहरेः

90 चेता इत्यत्र गुणे कर्तव्ये ह्रस्वस्य इकारस्य केन आन्तर्येण अकारः गुणत्वेन प्रसज्येत ?

A स्थानतः | B गुणतः

C अर्थतः | D प्रमाणतः

91 स्थानतः आन्तर्यस्य किमुदाहरणम् ?

A पदः | B वाग्घरिः

C सुध्युपास्यः | D अमू

92 गुणतः आन्तर्यस्य किमुदाहरणम् ?

A दतः | B स्याद्धलि

C दध्यत्र | D मध्वत्र

93 अर्थतः आन्तर्यस्य किमुदाहरणम् ?

A क्रोष्टा | B स्तोता

C अमुना | D नाज्झलौ

94 "षष्ठी स्थाने योगा" इत्यतः एकदेशानुवृत्या स्थाने ग्रहणे अनुवर्तमाने पुनः "स्थानेऽन्तरतमः" इति सूत्रे स्थानेग्रहणेन किं सिध्यति ?

A यत्रानेकविधमान्तर्यपरिभाषा

B निर्दिश्यमानपरिभाषा

C अर्थवत्परिभाषा

D गौणमुख्यपरिभाषा

95 प्रोढवान् इत्यत्र "प्रादूहोढोढ्येषैष्येषु" इति वृद्धिः कुतो न ?

A निर्दिश्यमानत्वाभावात्

B ऊढवान् इत्यस्यैकदेशस्य ऊढ इत्यस्यानर्थकत्वात्

C स्थानतः आन्तर्याभावात्

D अप्रधानत्वात्

96 अर्थवत्परिभाषा वर्णग्रहणेषु न इति कस्मिन् सूत्रे भाष्ये स्पष्टम् ?

A लस्य इति सूत्रे B व्रश्चादिसूत्रे

C संख्याया अतिशदन्ताया इति सूत्रे D येन विधिरिति सूत्रे

97 गौणमुख्ययोः कुत्र कार्यसम्प्रत्ययः ?

A गौणे B मुख्ये

C उभयत्र D लक्ष्यानुसारम्

98 गुणादागतः ........?

A गौणः B गुणवान्

C गुणं प्राप्तः D गुणहीनः

99 गोशब्दस्य जाड्यादिगुणनिमित्तोऽर्थो भवति –

A गौरेव B वाहीकः

C पशुविशेषः D शोभनो गौः

100 मुख्यः इत्यत्र कः प्रत्ययः?

A यत् B य

C ण्यत् D यक्

ANSWER KEY

M.Phil – Vyakaram

| *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY | *Q. No* | KEY |
|---|---|---|---|---|---|---|---|
| **1** | **B** | **26** | **A** | **51** | **A** | **76** | **A** |
| **2** | **C** | **27** | **D** | **52** | **B** | **77** | **D** |
| **3** | **C** | **28** | **A** | **53** | **A** | **78** | **A** |
| **4** | **D** | **29** | **A** | **54** | **C** | **79** | **B** |
| **5** | **B** | **30** | **B** | **55** | **D** | **80** | **C** |
| **6** | **D** | **31** | **B** | **56** | **A** | **81** | **B** |
| **7** | **D** | **32** | **D** | **57** | **D** | **82** | **A** |
| **8** | **B** | **33** | **C** | **58** | **A** | **83** | **D** |
| **9** | **D** | **34** | **A** | **59** | **B** | **84** | **C** |
| **10** | **D** | **35** | **A** | **60** | **C** | **85** | **A** |
| **11** | **C** | **36** | **A** | **61** | **B** | **86** | **C** |
| **12** | **B** | **37** | **B** | **62** | **A** | **87** | **B** |
| **13** | **A** | **38** | **A** | **63** | **B** | **88** | **B** |
| **14** | **A** | **39** | **C** | **64** | **C** | **89** | **A** |
| **15** | **C** | **40** | **D** | **65** | **A** | **90** | **D** |
| **16** | **C** | **41** | **A** | **66** | **C** | **91** | **C** |
| **17** | **C** | **42** | **A** | **67** | **A** | **92** | **B** |
| **18** | **B** | **43** | **D** | **68** | **B** | **93** | **A** |
| **19** | **D** | **44** | **B** | **69** | **A** | **94** | **A** |
| **20** | **C** | **45** | **C** | **70** | **B** | **95** | **B** |
| **21** | **C** | **46** | **A** | **71** | **A** | **96** | **A** |
| **22** | **C** | **47** | **B** | **72** | **C** | **97** | **B** |
| **23** | **A** | **48** | **A** | **73** | **B** | **98** | **A** |
| **24** | **B** | **49** | **D** | **74** | **C** | **99** | **B** |
| **25** | **A** | **50** | **C** | **75** | **A** | **100** | **B** |